श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीहयग्रीवस्तोत्रम् ॥

*This document* has been prepared by*

**Sunder Kidambi**

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

# ॥ श्रीहयग्रीवस्तोत्रम् ॥

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

ज्ञानानन्दमयं देवं निर्मलस्फटिकाकृतिम्।
आधारं सर्वविद्यानां हयग्रीवमुपास्महे॥ १ ॥

स्वतः सिद्धं शुद्धस्फटिकमणि भूभृत्प्रतिभटं
सुधासध्रीचीभिर्द्युतिभिरवदातत्रिभुवनम्।
अनन्तैस्त्रय्यन्तैरनुविहित हेषाहलहलं
हताशेषावद्यं हयवदनमीडीमहि महः॥ २ ॥

समाहारः साम्नां प्रतिपदमृचां धाम यजुषां
लयः प्रत्यूहानां लहरि विततिर्बोधजलधेः।
कथादर्पक्षुभ्यत्कथककुल कोलाहलभवं
हरत्वन्तर्ध्वान्तं हयवदन हेषा हलहलः॥ ३ ॥

प्राची सन्ध्या काचिदन्तर्निशायाः
प्रज्ञादृष्टेरञ्जनश्रीरपूर्वा।
वक्त्री वेदान् भातु मे वाजिवक्त्रा
वागीशाख्या वासुदेवस्य मूर्तिः॥ ४ ॥

विशुद्ध विज्ञान घन स्वरूपं विज्ञान विश्राणन बद्धदीक्षम्।
दयानिधिं देहभृतां शरण्यं देवं हयग्रीवमहं प्रपद्ये॥ ५ ॥

अपौरुषेयैरपि वाक्प्रपञ्चैः अद्यापि ते भूतिमदृष्टपाराम्।
स्तुवन्नहं मुग्ध इति त्वयैव कारुण्यतो नाथ कटाक्षणीयः॥ ६ ॥

दाक्षिण्यरम्या गिरिशस्य मूर्तिः देवी सरोजासन धर्मपत्नी।
व्यासादयोऽपि व्यपदेश्य वाचः स्फुरन्ति सर्वे तव शक्तिलेशैः॥ ७ ॥

मन्दोऽभविष्यन्नियतं विरिञ्चो
वाचां निधे वञ्चितभागधेयः।
दैत्यापनीतान् दययैव भूयोऽपि
अध्यापयिष्यो निगमान् न चेत् त्वम्॥ ८ ॥

वितर्कडोलां व्यवधूय सत्त्वे बृहस्पतिं वर्तयसे यतस्त्वम्।
तेनैव देव त्रिदशेश्वराणाम् अस्पृष्ट डोलायित माधिराज्यम्॥ ९ ॥

अग्नौ समिद्धार्चिषि सप्ततन्तोः आतस्थिवान् मन्त्रमयं शरीरम्।
अखण्डसारैर्हविषां प्रदानैः आप्यायनं व्योमसदां विधत्से॥ १० ॥

यन्मूलमीदृक् प्रतिभाति तत्त्वं या मूलमाम्नाय महाद्रुमाणाम्।
तत्त्वेन जानन्ति विशुद्ध सत्त्वाः तामक्षरा मक्षरमातृकां त्वाम्॥ ११ ॥

अव्याकृताद् व्याकृतवानसि त्वं नामानि रूपाणि च यानि पूर्वम्।
शंसन्ति तेषां चरमां प्रतिष्ठां वागीश्वर त्वां त्वदुपज्ञवाचः॥ १२ ॥

मुग्धेन्दु निष्यन्द विलोभनीयां मूर्तिं तवानन्द सुधा प्रसूतिम्।
विपश्चितश्चेतसि भावयन्ते वेलामुदारामिव दुग्धसिन्धोः॥ १३ ॥

मनोगतं पश्यति यः सदा त्वां मनीषिणां मानस राजहंसम्।
स्वयं पुरोभाव विवादभाजः किंकुर्वते तस्य गिरो यथार्हम्॥ १४ ॥

अपि क्षणार्धं कलयन्ति ये त्वाम् आप्लावयन्तं विशदैर्मयूखैः।
वाचां प्रवाहैरनिवारितैस्ते मन्दाकिनीं मन्दयितुं क्षमन्ते॥ १५ ॥

स्वामिन् भवद्ध्यान सुधाभिषेकात् वहन्ति धन्याः पुलकानुबन्धम्।
अलक्षिते क्वापि निरूढमूलम् अङ्गेष्विवानन्दथुम् अङ्कुरन्तम्॥ १६ ॥

स्वामिन् प्रतीचा हृदयेन धन्याः त्वद्ध्यान चन्द्रोदय वर्धमानम्।
अमान्तमानन्द पयोधिमन्तः पयोभिरक्ष्णां परिवाहयन्ति॥ १७ ॥

स्वैरानुभावास्त्वदधीन भावाः समृद्धवीर्यास्त्वदनुग्रहेण।
विपश्चितो नाथ तरन्ति मायां वैहारिकीं मोहन पिञ्छिकां ते॥ १८ ॥

प्राङ्गिर्मितानां तपसां विपाकाः प्रत्यग्रनिःश्रेयस संपदो मे।
समेधिषीरंस्तव पादपद्मे संकल्प चिन्तामणयः प्रणामाः॥ १९ ॥

विलुप्त मूर्धन्य लिपि क्रमाणां सुरेन्द्र चूडापद लालितानाम्।
त्वदंघ्रि राजीव रजःकणानां भूयान् प्रसादो मयि नाथ भूयात्॥ २० ॥

परिस्फुरन्नूपुर चित्रभानुप्रकाश निर्धूत तमोनुषङ्गाम्।
पदद्वयीं ते परिचिन्महेऽन्तः प्रबोध राजीव विभात सन्ध्याम्॥ २१ ॥

त्वत्किङ्करालंकरणोचितानां त्वयैव कल्पान्तर पालितानाम्।
मञ्जुप्रणादं मणिनूपुरं ते मञ्जूषिकां वेदगिरां प्रतीमः॥ २२ ॥

संचिन्तयामि प्रतिभा दशास्थान् संधुक्षयन्तं समय प्रदीपान्।
विज्ञान कल्पद्रुम पल्लवाभं व्याख्यान मुद्रा मधुरं करं ते॥ २३ ॥

चित्ते करोमि स्फुरिताक्षमालं सव्येतरं नाथ करं त्वदीयम्।
ज्ञानामृतोदञ्चनलम्पटानां लीलाघटी यन्त्रमिवाश्रितानाम्॥ २४ ॥

प्रबोध सिन्धोररुणैः प्रकाशैः प्रवाळ सङ्घातमिवोद्वहन्तम्।
विभावये देव सपुस्तकं ते वामं करं दक्षिणमाश्रितानाम्॥ २५ ॥

तमांसि भित्त्वा विशदैर्मयूखैः संप्रीणयन्तं विदुषश्चकोरान्।
निशामये त्वां नवपुण्डरीके शरद्घने चन्द्रमिवस्फुरन्तम्॥ २६ ॥

दिशन्तु मे देव सदा त्वदीयाः दयातरङ्गानुचराः कटाक्षाः।
श्रोत्रेषु पुंसाममृतं क्षरन्तीं सरस्वतीं संश्रित कामधेनुम्॥ २७ ॥

विशेषवित्पारिषदेषु नाथ विदग्ध गोष्टीसमराङ्गणेषु।
जिगीषतो मे कवितार्किकेन्द्रान् जिह्वाग्र सिंहासनमभ्युपेयाः॥ २८ ॥

त्वां चिन्तयन् त्वन्मयतां प्रपन्नः त्वामुद्गृणन् शब्दमयेन धाम्ना।
स्वामिन् समाजेषु समेधिषीय स्वच्छन्द वादाहव बद्धशूरः॥ २९ ॥

नानाविधानामगतिः कलानां न चापि तीर्थेषु कृतावतारः।
ध्रुवं तवानाथपरिग्रहायाः नवं नवं पात्रमहं दयायाः॥ ३० ॥

अकम्पनीयान्यपनीति भेदैः अलंकृषीरन् हृदयं मदीयम्।
शङ्काकळङ्कापगमोज्ज्वलानि तत्त्वनि सम्यञ्चि तव प्रसादात्॥ ३१ ॥

व्याख्या मुद्रां करसरसिजैः पुस्तकं शङ्खचक्रे
बिभ्रद्भिन्नस्फटिकरुचिरे पुण्डरीके निषण्णः।
अम्लानश्रीरमृतविशदैरंशुभिः प्लावयन् मां
आविर्भूयादनघ महिमा मानसे वागधीशः॥ ३२ ॥

वागर्थ सिद्धिहेतोः पठत हयग्रीवसंस्तुतिं भक्त्या।
कवितार्किककेसरिणा वेङ्कटनाथेन विरचितामेताम्॥ ३३ ॥

॥ इति श्रीहयग्रीवस्तोत्रम् समाप्तम् ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥